कृ - 143

परि० सं० 5570

देवी माहात्म्य मूर्ति रहस्य
तन्त्र

9 - पूर्ण

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

देवी माहात्म्य मूर्ति रहस्य

पी० स० 5570 त्रन्ना

१- अपूर्ण

5570

60-143

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

॥ मध्यनस्यानुरूप

श्री गणेशाय नमः॥ अथ स्वामे पषि कर्तव्यं सूर्यस्य व्रतमुत्तमं मार्गशीर्ष

दि मासषष्ठकेथय स्वमहाप्रभो १ ईश्वर उवाच॥ पूर्वं च मार्गशीर्षे

न तु लोशीय पत्रे त्रयस्य तं॥२॥ पौषे वृतपल चिरणी॥३॥ माघे मुष्टि

तिलत्रयं॥३॥४॥ फाल्गुने च प्रव सामिपलत्रयं व ६ चीस्तं॥४॥

वैशे दुग्ध पलत्रीरणी॥३॥ वैशाखे गोमयस्तपा॥३॥ ज्येष्ठे उदकं पि

त्वा अंजुली त्रय मुत्तमम्॥३॥ आषाढे मरिची स्त्रीरणि॥३॥ त

निरपलत्रयं३॥ श्रा वणे चप्रव सामि धात्री च यं फलम्॥३॥

श्री श॰ सूर्य शत्रुमध्ये गतोरणे विषमे दुर्गमे चैव भयार्त्ताः शरणं गताः ६

न तेषां जायते किंचित् शुभं रणसंकटे नापदं तस्य पश्यामि शोक दुः

खभयं न हि ७ ये तु भक्त्या स्मरन्ति त्वां न तेषां म द्विः प्रजायते प्रेत

संस्थानु याम्यां वाराही महिषासना ८ ऐंद्री गजसमारूढा वै

ष्णवी गरुडासना माहेश्वरी वृषारूढा कौमारी शिखिवाहना ९

ब्राह्मी हंससमारूढा सर्वाभरणभूषिताः नानाभरणशोभाढ्या

नानारत्नोपसंयुताः १० दृश्यंते रथमारूढा देव्याः क्रोधस

माकुलाः शंखं चक्रं गदां शक्तिं हलं च मुसलायुधं ११ खेट

कं तोमरं चैव परशुं पाशमेव च कुंतायुधं वज्रं च शार्ङ्गमायुध

मुत्तमं १ ... ... नामभयाय च धारयं

... ... न ... मीमहा ...

... थने स्थानुरूप ...

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

...मुधानी ... नाय वै १३ नमस्तेस्तु महारौद्रे महा
घोरपराक्रमे महाबले महोत्साहे महाभयविनाशिनि १४
२ त्राहि मां देवि दुःप्रेक्षे शत्रूणां भयवर्द्धिनी प्राच्यां रक्षतु मां
मैन्द्री आग्नेय्यामग्निदेवता १५ दक्षिणास्यां च वाराही नैरृत्यां
खड्गधारिणी प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी १६
उदीच्यां दिशि कौवेरी ईशान्यां शूलधारिणी ऊर्द्ध्वं ब्रह्मा
णी अधस्ताद्वैष्णवी तथा १७ एवं दश दिशो रक्षेच्चामुण्डा
शववाहना जया मे चाग्रतो रक्षेत पृष्ठतो विजया तथा १८ अजि
ता वामपार्श्वे तु दक्षिणे चापराजिता शिखां मे द्योतिनी रक्षे
दुमा मूर्ध्नि व्यवस्थिता १९ मालाधरी ललाटे च भ्रुवौ र २

दुः क्ता महालक्ष्मीः स्वरूपमपरं नृप सत्त्वाख्येनाति शु
में द्धेन गुणेनेन्दुप्रभं दधौ १५ अक्षमालांकुशधरा वीणा
पुस्तकधारिणी सा बभूव वरा नारी नामान्यस्यै च सा
ददौ १६ महाविद्या महावाणी भारती वाक् सरस्व
ती आर्या ब्राह्मी महाधेनुर्वेदगर्भा च धीश्वरी १७
अथोवाच महालक्ष्मीः ससर्ज मिथुनं स्वयं हिर
ण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ १८ ब्रह्मन्वि
धे विरिंचे ति धातरित्याह तं नरं श्रीः पद्मे कमले लक्ष्मी
६१ त्याह माता स्त्रियं च ताम् १९ महाकाली भारती च मि
सा प्रोवाच महालक्ष्मीर्महाकालीं सरस्वतीं युवां जनय
तां देव्यौ मिथुने स्वानुरूपतः इत्युक्ता ते ४

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

दुः
३

पुनेस्सजतःस्वमहा एतद्घोरपि रूपाद्यानामानि वव्हा
मिते २० नीलकंठं रक्तदंताहं श्वेतांगं चंद्रशेखरं जन तीर
यामास पुरुषं महाभागोभितां स्त्रियं २१ सरुद्रः शंक
रः स्थाणुः कपर्दी च त्रिलोचनः त्रयीविद्याकामधेनुः
सा स्त्री भाषाक्षरा स्वरा २२ सरस्वतीं स्त्रियं गौरीं कृष्णं च प
पुरुषं नृप जनयामास नामानि तयोरपि वदामि ते
२३ विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः उमा गौ
री सती चण्डी सुन्दरी सुभगा शुभा २४ एवं युव
तयः सद्यः पुरुषत्वं प्रपेदिरे चक्षुष्मंतो नु पश्यं ३

धं१ के३

श्रीः
पासाप्याप्य कृत्स्नं व्यवस्थितापि मातुलिंगं गदां खे
टं पानपात्रं च बिभ्रती नागं लिंगं च योनिं च बिभ्र
ती नृप मूर्धनि ६ तप्तकांचनवर्णाभा तप्तकांच
नभूषणा शून्यं तदखिलं स्वेन पूरयामास तेजसा ७
शून्यं तदखिलं लोकं विलोक्य परमेश्वरी बभार
मप ३ रूपमपरं तमसा केवलेन हि ८ साभिन्नांज
नसंकाशा दं ष्ट्राचितवरानना विशाललो
चना नारी बभूव तनुमध्यमा ९ खड्गपात्रशि

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

श्री: शिर:खेटैरलंकृतचतुर्भुजा कूबंधहारं शिरसा
४ बिभ्रती हि शिर:स्रजं १० सैषोवाच महालक्ष्मीस्ता
मसीप्रमहेनमा नामकर्मे च मे ज्ञात्वैहिहितुभ्यं न
मोस्तुते ११ तां प्रोवाच महालक्ष्मी स्तामसीं प्रमहे
नमा इति तव नामानि यानि कर्माणि तानि वै १२
महामाया महाकाली महामारी क्षुधा तृषा नि
द्रा तृष्णा चैक वीरा च कालरात्रि दुरत्यया १३ इमानि
तव नामानि प्रतिपाद्यानि तामसि एभि: कर्मा
णि ते ज्ञात्वा योधीते सोश्नुते सुखं १४ तामित्यु २

ते   तेमपार

५: ति नेतरे तहि देज ना: २५ ब्रह्मरो प्र द्दे प त्नीं सावित्रीं
तं पसत्तमा रुद्राय गौरीं वरदां वासुदेवाय च श्रियं
२६ स्वरया सह संभूय विरंच्योंडमजीजनत विभेद भ
गवान्रुद्रस्तङ्गौर्या सह वीर्यवान २७ अंडमध्ये प्रधानादि कार्यं जातं नृप (margin) महाभूतात्मकं स
पुपाद्य पालय
त्मासतल्लक्ष्म्या सह केशव: संजहारे दृशं सर्वं सह गौ
र्या महेश्वर: २८ महालक्ष्मी महा सर्व सत्वमयी
श्वरी निराकारा च साकारा सैव नानाभिधानभृत २०
नामांतरैर्निरूप्येषा नाम्ना नान्येन केनचित्

[illegible] ५

वेनाजन्

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

रुयपुनारो २

दु: नामानिवर्णयाराजन्नैरप्यातव्यानिवस्थवित ३१
र: इतिमार्कंडेप्राधानिकंरहस्यंनामचतुर्दशोध्यायः १४
४ ऋषिरुवाच १ त्रिगुणातामसीदेवीसात्विकीयात्रि
धोदितासासर्वाचंडिकादुर्गाभद्राभगवतीर्यते २
योगनिद्राहरेरुक्तामहाकालीतमोगुणा मधुकैटभ
म्बु३ नाशार्थंयांतुष्टावांबुजासनः ३ दशवक्त्रादशभु
जादशपादांजनप्रभा विशालयाराजमानात्रिंश
ल्लोचनमालया ४ स्फुरद्दशनदंष्ट्रासाभीमरूप ४

रा२

श्री: पापिभूमिप· रूपसौभाग्यकांतीनांसाप्रतिष्ठामहाश्रया ५
खड्गबाणगदाशूलशंखचक्रभुशुंडिभृत् परिघंकार्मुकं
शीर्षंनिश्च्योतद्रुधिरंदधौ ६ एषासावैष्णवीमायामहाकालीदुरत्य
शी ईरत्यया आराधितावशीकुर्यात्पूजाकर्तुश्चराचरं ७ सर्व
देवशरीरेभ्योयाविर्भूतामितप्रभा त्रिगुणासामहालक्ष्मीः
साक्षान्महिषमर्दिनी ८ श्वेताननानीलभुजासुश्वेतस्त
नमंडला रक्तमध्यारक्तपादानीलजंघोरुरुन्मदा ९ सु
चित्रजघनाचित्रमाल्यांबरविभूषणा चित्रानुलेपनाकां
तीरूपसौभाग्यशालिनी १० अष्टादशभुजापूज्यासास

सादेवीवशीकुर्यात्जगत्रयम् ६

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

दु हस्रभुजासती आयुधान्यत्रवक्ष्यन्ते दक्षिणाधःकरक्रमात् ११
र: अक्षमालांचकमलंबाणोसिः कुलिशंगदा चक्रंत्रिशूलंपरशुः
५ शंखोघंटाचपाशकः १२ शक्तिर्दण्डश्चर्मचापंपानपात्रंक
मण्डलुः अलंकृतभुजामेभिरायुधैः कमलासनां १३ सर्व
देवमयीमीशांमहालक्ष्मीमिमिमांनृप पूजयेत्सर्वलोका
नांसदेवानांप्रभुर्भवेत् १४ गौरीदेहात्समुद्भूतायासत्वैक
गुणाश्रया साक्षात्सरस्वतीप्रोक्ताशुंभासुरनिवर्हिणी १५
चौ २ दधौचाष्टभुजाबाणमुशलेशूलचक्रभृत् शंखंघंटांलांगलं
कार्मुकंचवसुधाधिप १६ एषासंपूजिताभक्त्यासर्वज्ञत्वं ५
सा २

श्री: प्रयच्छति निशुंभमथनीदेवीशुंभासुरनिवर्हिणी १७ इत्यु
क्तानिस्वरूपाणिमूर्तीनांतवपार्थिव उपासनंजगन्मातुः पृथ
गासांनिशामय १८ महालक्ष्मीर्यदापूज्यामहाकालीसरस्व
ती दक्षिणोत्तरयोः पूज्येपृष्ठतोमिथुनत्रयं १९ विरंचिः
स्वरयामध्येरुद्रोगौर्याचदक्षिणे वामेलक्ष्म्याहृषीकेशः
पुरतोदेवतात्रयं २० अष्टादशभुजामध्येवामेचास्यादशनना
दक्षिणेष्टभुजालक्ष्मीर्वृत्तिरायायायथाक्रमं ″ पूजीदिदलतः २त
पूज्या असितांगारभैरवा ′ २१ अष्टादशभुजाचैषायदापू २१
ज्यानराधिप २२ दशाननाचाष्टभुजादक्षिणोत्तरयोस्तदा
कृ: घञ
दक्षिणोऽष्टभुजामध्येमहतीतिसमर्चयेत् ओं २

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

कालमृत्यू च संपूज्यौ सर्वारिष्टप्रशांतये २३ ततस्त्वष्टभुजा
पूज्या शुंभासुरनिबर्हिणी नवास्याः शक्तयः पूज्यास्तथा रु
द्रविनायकौ २४ नमो देव्या इति स्तोत्रैर्महादेवीं समर्चयेत्
अवतारत्रयार्चायां स्तोत्रमंत्रास्तदाश्रयाः २५ अष्टादशभु
जा चैषा पूज्या महिषमर्दिनी महालक्ष्मीर्महाकाली सैव
प्रोक्ता सरस्वती २६ ईश्वरी पुण्यपापानां सर्वलोकम
हेश्वरी महिषांतकरी येन पूजिता स जगत्प्रभु २७ पूजये
ज्जगतां धात्रीं चंडिकां भक्तवत्सलां अर्घादिभिरलंकारैर्गं
धपुष्पाक्षतैस्तथा २८ धूपैर्दीपैश्च नैवेद्यैर्नानाभक्ष्य

समन्वितैः रुधिराक्तेन बलिना मांसेन सुरया नृप २९ बाण
भागेन तो देव्याश्छिन्नशीर्षं महासुरं पूजयेन्महिषं येन प्राप्तं
सायुज्यमीशया ३१ दक्षिणाः पुरतः सिंहं समग्रं धर्ममीश्वरं
वाहनं पूजयेद्देव्या धृतं येन चराचरं ३२ लिखित्वा च्छदलं प
द्मं वंदनीरक्तकुंकुमैः षट्कोणांतः स्थितं कुर्यादेवीनन्यां यतो न्यसे
त् ३३ ततः कृतांजलिर्भूत्वा स्तुवीत चरितैरिमैः कुर्याच्च
स्तवनं धीमान्स्तोत्रस्यामेवात्मानसः ३४ एकेन वा मध्यमेन नै
केनेतरयोरिह अर्धं चरितार्धं तु न जपेज्जपंश्छिद्रमवाप्नुयात् ३५
स्तोत्रमंत्रैः स्तुवीतेमां यदि वा जगदम्बिकाम् प्रदक्षिणान
मस्कारान्कृत्वा मूर्ध्नि कृतांजलिः क्षमापयेज्जगद्धात्रीं मुहुर्मुहुरतंद्रितः

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

नमस्कारं कृत्वा मूर्ध्नि कृतांजलि ३६ समापयेः जगद्धात्रीं हृन्मुद्र
तंद्रितः प्रतिश्लोकं च जुहुयात्पायसं तिलसर्पिषा ३७ जुहुयात्स्तो
त्रमंत्रैर्वा चंडिकायै शुभं हविः नमो नमः पदं देवीं पूजयेत्सुसमा
हितः ३८ प्रयतः प्रांजलिः प्रह्वः प्रणामानारोप्य चात्मनि सुचि
रं भावयेद्देवीं चंडिकां तन्मयो भवेत् ३९ एवं यः पूजयेद्
भक्त्या प्रत्यहं परमेश्वरीं भुक्त्वा भोगान्यथाकामं देवीसायुज्यमा
प्नुयात् ४० यो न पूजयते नित्यं चंडिकां भक्तवत्सलां भस्मीकृ
त्यास्य पुण्यानि निर्दहेत्परमेश्वरी ४१ तस्मात्पूजय भूपाल
सर्वलोकमहेश्वरीं यथोक्तेन विधानेन चंडिकां सुखमाप्स्यसि

पठित्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥

इति मार्कं॰ वैकृतिकं नाम पंचदशोध्यायः १५ ऋषिरुवाच १
नन्दा भगवती नाम या भविष्यति नंदजा सा स्तुता पूजिता भक्त्या वशी
कुर्याज्जगत्त्रयं २ कनकोत्तमकांतिः सा सुकांतिकनकांबरा देवी
कनकवर्णाभा कनकोत्तमभूषणा ३ कमलांकुशपाशाब्जैरलं
कृतचतुर्भुजा इंदिरा कमला लक्ष्मीः सा श्री रुक्मांबुजासना ४ या
रक्तदंतिका नाम देवी प्रोक्ता मयानघ तस्याः स्वरूपं वक्ष्यामि शृणु
पापभयापहं ५ रक्ततीक्ष्णनखा रक्तदशना रक्तदंतिका प
तिं नारीवानुरक्ता देवी भक्तं भजेज्जनं ७ वसुदेव विशाला सा
सुमेरुयुगस्तनी दीर्घौ लंबावतिस्थूलौ तावतीव मनोहरौ ८ कर्क
शि
रक्तांबरा रक्तवर्णा रक्तसर्वांगभूषणा रक्तायुधा रक्तनेत्रा रक्तकेशा

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

दु० रगवति कांतौ वसतीनन पयोनिधी मन्नपान्सं कारयेद्देवी सर्वश्र
८ मदुधौस्तनौ ९ खड्गं पात्रं च मुशलं लांगलं च बिभर्ति सा आख्या
तारक्त चामुण्डा देवी योगेश्वरीति च १० अनया व्याप्तमखिलं ज
गत्स्थावरजंगमं इमां यः पूजयेद्भक्त्या स व्याप्नोति चराचरं ११
अधीते य इमं नित्यं रक्तदंत्या वपुस्तवम् ११ तं स्मा परिचरेद्देवि
पतिं प्रियमिवांगना शाकंभरी नीलवर्णा नीलोत्पलविलोचना
गंभीरनाभिस्त्रिवलीविभूषिततनूदरी १२ सुकर्कशसमोत्तुंग
वृत्तपीनघनस्तनी मुष्टिं शिलीमुखैः पूर्णं कमलं कमला
लया १३ पुष्पपल्लवमूलादिफलाढ्यं शाकसंचयं काम्यानं
तरसैर्युक्तं क्षुत्तृण्मृत्युभयापहं १४ कार्मुकं च स्फुरत्कां ८

त्रिभार

श्री० तिबिभ्रती परमेश्वरी शाकंभरी शताक्षी सा सैव दुर्गा प्रकीर्ति
ता १५ उमा गौरी सती चंडी कालिका सा च पार्वती शाकंभरीं स्तुवन्
ध्यायञ्जपन्संपूजयन्नमन् १६ अक्षय्यमश्नुते शीघ्रमन्नपा पा
नाद्यं तंपलं भीमापि नीलवर्णा सा दंष्ट्रा दशनभासुरा १७
विशाललोचना देवी वृत्तपीनपयोधरा चंद्रहासं च डमरुं शि
रः पात्रं च बिभ्रती १८ एकवीरा कालरात्रिः सैवोक्ता कामदा स्तुता म
तेजोमंडलदुर्धर्षा भ्रामरी चित्रकांतिभृत् १९ चित्रभ्रमर
पाणिः सा महामारीति गीयते इत्येता मूर्तयो देव्याः
ख्यातास्ते वसुधाधिप २० जगन्मातुश्चण्डिकायाः कीर्तिताः
कामधेनवः इदं रहस्यं परमं न वाच्यं यस्य कस्यचित् २१

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri

दु: व्याख्यानं दिव्यमूर्तीनामभिधेयो वहितः स्वयम् २२ ॥
इति मार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमहात्म्ये मूर्ति
९ रहस्यनाम षोडशोध्यायः १६ ॥ ॥ ॥
सुभसम्वत्सरा १८९७ शाके १७६२ भाद्रपद शुक्ल त्र
योदस्यां बुधवासरे व्यलीख्य गंगाप्रशादेन सुभमभूयात् ॥

देवी माहात्म्य मूर्ति रहस्य

टीका

९

CC-0 Devanagari Manuscripts at UPSS Lucknow, Digitized by eGangotri